# Sundarakandaramayananirnaya

# સુન્દરકાણ્ડરામાયણનિર્ણયઃ

## Document Information

Text title : sundarakANDarAmAyaNanirNaya

File name : sundarakANDarAmAyaNanirNaya.itx

Category : hanumaana, stotra, Ananda-tIrtha, hanuman

Location : doc_hanumaana

Author : AnandatIrtha, Madhvacharya

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran psaeaswaran at gmail

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 18, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# સુન્દરકાણ્ડરામાયણનિર્ણયઃ

રામાય શાશ્વતસુવિસ્તૃતષડ્ગુણાય
    સર્વેશ્વરાય બલવીર્યમહાર્ણવાય ।
નત્વા લિલઙ્ઘયિષુરર્ણવમુત્પપાત
    નિષ્પીડ્ય તં ગિરિવરં પવનસ્ય સૂનુઃ ॥ ૧॥

ચુક્ષોભ વારિધિરનુપ્રયયૌ ચ શીઘ્રં
    યાદોગણૈઃ સહ તદીયબલાભિકૃષ્ટઃ ।
વૃક્ષાશ્ચ પર્વતગતાઃ પવનેન પૂર્વં
    ક્ષિપ્તોઽર્ણવે ગિરિરુદાગમદસ્ય હેતોઃ ॥ ૨॥

શૈલો હરસ્ય ગિરિપક્ષવિનાશકાલે
    ક્ષિપ્તોઽર્ણવે સ મરુતોર્વરિતાત્મપક્ષઃ ।
હૈમો ગિરિઃ પવનજસ્ય તુ વિક્રમાર્થ-
    મુદ્ભિદ્ય વારિધિમવર્ધદનેકસાનુઃ ॥ ૩॥

નૈવાત્ર વિક્રમણમૈચ્છદવિશ્રમોઽસૌ
    નિઃસીમપૌરુષબલસ્ય કુતઃ શ્રમોઽસ્ય ।
આશ્લિષ્ય પર્વતવરં સ દદર્શ ગચ્છન્
    દેવૈસ્તુ નાગજનનીં પ્રહિતાં વરેણ ॥ ૪॥

જિજ્ઞાસુભિર્નિજબલં તવ ભક્ષમેતુ
    યદ્યત્ત્વમિચ્છસિ તદિત્યમરોદિતાયાઃ ।
આસ્યં પ્રવિશ્ય સપદિ પ્રવિનિઃસૃતોઽસ્માત્
    દેવાનનન્દયદુત સ્વકમેષુ રક્ષન્ ॥ ૫॥

દૃષ્ટ્વા સુરપ્રણયિતાં બલમસ્ય ચોગ્રં
    દેવાઃ પ્રતુષ્ટુવુરમું સુમનોઽભિવૃષ્ટ્યા ।
તૈરાદૃતઃ પુનરસૌ વિયતૈવ ગચ્છન્
    છાયાગ્રહં પ્રતિદદર્શ ચ સિંહિકાખ્યમ્ ॥ ૬॥

લઙ્કાવનાય સકલસ્ય ચ નિગ્રહેઽસ્યાઃ
    સામર્થ્યમપ્રતિહતં પ્રદદૌ વિધાતા ।
છાયામવાક્ષિપદસૌ પવનાત્મજસ્ય
    સોઽસ્યાઃ શરીરમનુવિશ્ય બિભેદ ચાશુ ॥ ૭॥

નિઃસીમમાત્મબલમિત્યસુદર્શયાનો
    હત્વૈવ તામપિ વિધાતૃવરાભિગુપ્તામ્ ।
લમ્બે સ લમ્બશિખરે નિપપાત લઙ્કા-
    પ્રાકારરૂપકગિરાથ ચ સઞ્ચુકોચે ॥ ૮॥

ભૂત્વા બિડાલસમિતો નિશિ તાં પુરીં ચ
    પ્રાપ્સ્યન્ દદર્શ નિજરૂપવતીં સ લઙ્કામ્ ।
રુદ્ધોઽનયાઽઽશ્વથ વિજિત્ય ચ તાં સ્વમુષ્ટિ-
    પિષ્ટાં તયાનુમત એવ વિવેશ લઙ્કામ્ ॥ ૯॥

માર્ગમાણો બહિશ્ચાન્તઃ સોઽશોકવનિકાતલે ।
દદર્શ શિંશપાવૃક્ષમૂલસ્થિતરમાકૃતિમ્ ॥ ૧૦॥

નરલોકવિડમ્બસ્ય જાનન્ રામસ્ય હૃદ્ગતમ્ ।
તસ્ય ચેષ્ટાનુસારેણ કૃત્વા ચેષ્ટાશ્ચ સંવિદમ્ ॥ ૧૧॥

તાદૃક્ચેષ્ટાસમેતાયા અઙ્ગુલીયમદાત્તતઃ ।
સીતાયા યાનિ ચૈવાસન્નાકૃતેસ્તાનિ સર્વશઃ ॥ ૧૨॥

ભૂષણાનિ દ્વિધા ભૂત્વા તાન્યેવાસન્ તથૈવ ચ ।
અથ ચૂડામણિં દિવ્યં દાતું રામાય સા દદૌ ॥ ૧૩॥

યદ્યપ્યેતન્ન પશ્યન્તિ નિશાચરગણાસ્તુ તે ।
દ્યુલોકચારિણઃ સર્વે પશ્યન્ત્યૃષય એવ ચ ॥ ૧૪॥

તેષાં વિડમ્બનાયૈવ દૈત્યાનાં વઞ્ચનાય ચ ।
પશ્યતાં કલિમુખ્યાનાં વિડમ્બોઽયં કૃતો ભવેત્ ॥ ૧૫॥

કૃત્વા કાર્યમિદં સર્વં વિશઙ્કઃ પવનાત્મજઃ ।
આત્માવિષ્કરણે ચિત્તં ચક્રે મતિમતાં વરઃ ॥ ૧૬॥

અથ વનમખિલં તદ્રાવણસ્યાવલમ્બ્ય
ક્ષિતિરુહમિમમેકં વર્જયિત્વાઽઽશુ વીરઃ ।

રજનિચરવિનાશં કાંક્ષમાણોઽતિવેલં
મુહુરતિરવનાદી તોરણં ચારુરોહ ॥ ૧૭॥

અથાશ‍ૃણોદ્દશાનનઃ કપીન્દ્રચેષ્ટિતં પરમ્ ।
દિદેશ કિઙ્કરાન્ બહૂન્ કપિર્નિગૃહ્યતામિતિ ॥ ૧૮॥

સમસ્તશો વિમૃત્યવો વરાદ્ધરસ્ય કિઙ્કરાઃ ।
સમાસદન્મહાબલં સુરાન્તરાત્મનોઽઙ્ગજમ્ ॥ ૧૯॥

અશીતિકોટિયૂથપં પુરઃસરાષ્ટકાયુતમ્ ।
અનેકહેતિસઙ્કુલં કપીન્દ્રમાવૃણોદ્બલમ્ ॥ ૨૦॥

સમાવૃતસ્તથાઽઽયુધૈઃ સ તાડિતશ્ચ તૈર્ભૃશમ્ ।
ચકાર તાન્ સમસ્તશસ્તલપ્રહારચૂર્ણિતાન્ ॥ ૨૧॥

પુનશ્ચ મન્ત્રિપુત્રકાન્ સ રાવણપ્રચોદિતાન્ ।
મમર્દ સપ્તપર્વતપ્રભાન્ વરાભિરક્ષિતાન્ ॥ ૨૨॥

બલાગ્રગામિનસ્તથા સ શર્વવાક્સુગર્વિતાન્ ।
નિહત્ય સર્વરક્ષસાં તૃતીયભાગમક્ષિણોત્ ॥ ૨૩॥

અનૌપમં હરેર્બલં નિશમ્ય રાક્ષસાધિપઃ ।
કુમારમક્ષમાત્મનઃ સમં સુતં ન્યયોજયત્ ॥ ૨૪॥

સ સર્વલોકસાક્ષિણઃ સુતં શરૈર્વવર્ષ હ ।
શિતૈર્વરાસ્ત્રમન્ત્રિતૈર્ન ચૈનમભ્યચાલયત્ ॥ ૨૫॥

સ મણ્ડમધ્યગાસુતં સમીક્ષ્ય રાવણોપમમ્ ।
તૃતીય એષ ભાંશકો બલસ્ય હીત્યચિન્તયત્ ॥ ૨૬॥

નિધાર્ય એવ રાવણો રાઘવસ્ય નાન્યથા ।
યુધીન્દ્રજિન્મયા હતો ન ચાસ્ય શક્તિરીક્ષ્યતે ॥ ૨૭॥

અતસ્તયોઃ સમો મયા તૃતીય એષ હન્યતે ।
વિચાર્ય ચૈવમાશુ તં પદોઃ પ્રગૃહ્ય પુપ્લુવે ॥ ૨૮॥

સ ચક્રવદ્ભ્રમાતુરં વિધાય રાવણાત્મજમ્ ।
અપોથયદ્ધરાતલે ક્ષણેન મારુતીતનુઃ ॥ ૨૯॥

વિચૂર્ણિતે ધરાતલે નિજે સુતે સ રાવણઃ ।
નિશમ્ય શોકતાપિતસ્તદગ્રજં સમાદિશત્ ॥ ૩૦॥

અથેન્દ્રજિન્મહાશરૈર્વરાસ્ત્રસમ્પ્રયોજિતૈઃ ।
તતશ્ચ વાનરોત્તમં ન ચાશકદ્વિચાલને ॥ ૩૧॥

અથાસ્ત્રમુત્તમં વિધેર્મુમોચ સર્વદુઃસહમ્ ।
સ તેન તાડિતો હરિર્વ્યચિન્તયન્નિરાકુલઃ ॥ ૩૨॥

મયા વરા વિલઙ્ઘિતા હ્યનેકશઃ સ્વયમ્ભુવઃ ।
સ માનનીય એવ મે તતોઽત્ર માનયામ્યહમ્ ॥ ૩૩॥

ઇમે ચ કુર્યુરત્ર કિં પ્રહૃષ્ટરક્ષસાં ગણાઃ ।
ઇતીહ લક્ષ્યમેવ મે સ રાવણશ્ચ દૃશ્યતે ॥ ૩૪॥

ઇદં સમીક્ષ્ય બદ્ધવત્ સ્થિતં કપીન્દ્રમાશુ તે ।
બબન્ધુરન્યપાશકૈર્જગામ ચાસ્ત્રમસ્ય તત્ ॥ ૩૫॥

અથ પ્રગૃહ્ય તં કપિં સમીપમાનયંશ્ચ તે ।
નિશાચરેશ્વરસ્ય તં સ પૃષ્ટવાંશ્ચ રાવણઃ ॥ ૩૬॥

કપે કુતોઽસિ કસ્ય વા કિમર્થમીદૃશં કૃતમ્ ।
ઇતીરિતઃ સ ચાવદત્ પ્રણમ્ય રામમીશ્વરમ્ ॥ ૩૭॥

અવેહિ દૂતમાગતં દુરન્તવિક્રમસ્ય મામ્ ।
રઘૂત્તમસ્ય મારુતિં કુલક્ષયે તવેશ્વરમ્ ॥ ૩૮॥

ન ચેત્ પ્રદાસ્યસિ ત્વરન્ રઘૂત્તમપ્રિયાં તદા ।
સપુત્રમિત્રબાન્ધવો વિનાશમાશુ યાસ્યસિ ॥ ૩૯॥

ન રામબાણધારણે ક્ષમાઃ સુરેશ્વરા અપિ ।
વિરિઞ્ચશર્વપૂર્વકાઃ કિમુ ત્વમલ્પસારકઃ ॥ ૪૦॥

પ્રકોપિતસ્ય તસ્ય કઃ પુરઃ સ્થિતૌ ક્ષમો ભવેત્ ।
સુરાસુરોરગાદિકે જગત્યચિન્ત્યકર્મણઃ ॥ ૪૧॥

ઇતીરિતે વધોદ્યતં ન્યવારયદ્વિભીષણઃ ।
સ પુચ્છદાહકર્મણે ન્યયોજયન્નિશાચરાન્ ॥ ૪૨॥

અથાસ્ય વસ્ત્રસઞ્ચયૈઃ પિધાય પુચ્છમગ્નયે ।
દદુર્દદાહ નાસ્ય તન્મરુત્સખો હુતાશનઃ ॥ ૪૩॥

મમર્ષ સર્વચેષ્ટિતં સ રક્ષસાં નિરામયઃ ।

બલોદ્ધતશ્ચ કૌતુકાત્ પ્રદગ્ધુમેવ તાં પુરીમ્ ॥ ૪૪॥

દદાહ ચાખિલાં પુરીં સ્વપુચ્છગેન વહ્નિના ।
કૃતિસ્તુ વિશ્વકર્મણોઽપ્યદહ્યતાસ્ય તેજસા ॥ ૪૫॥

સુવર્ણરત્નકારિતાં સ રાક્ષસોત્તમૈઃ સહ ।
પ્રદહ્ય સર્વશઃ પુરીં મુદાન્વિતો જગર્જ વૈ ॥ ૪૬॥

સ રાવણં સપુત્રકં તૃણોપમં વિધાય વૈ ।
તયોઃ પ્રપશ્યતોઃ પુરીં વિધાય ભસ્મસાદ્યયૌ ॥ ૪૭॥

વિલઙ્ઘ્ય ચાર્ણવં પુનઃ સ્વજાતિભિઃ પ્રપૂજિતઃ ।
પ્રભક્ષ્ય વાનરેશિતુર્મધુ પ્રભું સમેયિવાન્ ॥ ૪૮॥

રામં સુરેશ્વરમગણ્યગુણાભિરામં
        સમ્પ્રાપ્ય સર્વકપિવીરવરૈઃ સમેતઃ ।
ચૂડામણિં પવનજઃ પદયોર્નિધાય
        સર્વાઙ્ગકૈઃ પ્રણતિમસ્ય ચકાર ભક્ત્યા ॥ ૪૯॥

રામોઽપિ નાન્યદનુદાતુમમુષ્ય યોગ્યમ્-
        અત્યન્તભક્તિભરિતસ્ય વિલક્ષ્ય કિઞ્ચિત્ ।
સ્વાત્મપ્રદાનમધિકં પવનાત્મજસ્ય
        કુર્વન્ સમાશ્લિષદમું પરમાભિતુષ્ટઃ ॥ ૫૦॥

ઇતિ શ્રીમદાનન્દતીર્થીયમહાભારતતાત્પર્યનિર્ણયે રામચરિતે
હનુમત્પ્રતિયાનં સુન્દરકાણ્ડકથાનિર્ણયઃ ॥

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*Sundarakandaramayananirnaya*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*